# यदागमपरिभाषाविचारः

डॉ. अजयकुमारदाशः

**सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते ।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ।।**[१],

**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः** (वाक्यपदीये) इति व्यासभर्तृहरिमतानुसारं भाषाजगति भावविनिमयाय मानवानां सर्वप्रमुखं साधनं शब्दशास्त्रं नाम व्याकरणमित्यनस्वीकार्यम् । तच्च व्याकरणं यदा प्रयोगक्षेत्रं प्रवृत्तं प्रसृतं वा भवति तदा तस्य षड्विधं सप्तविधं वा सूत्रानुशासनामधारीकृत्यैव प्रवर्त्तनम्। अतो व्याकरणं नाम सूत्रमिति कण्ठरवेण पस्पशाह्निके विवेचितम् ।

यद्यपि प्रयोगक्षेत्रे पाणिनीयाष्टाध्यायीविद्यमानानां सर्वेषां सूत्राणां प्रवृत्तिर्दृश्यते, तथापि अनियमे नियमकारिणी या सा इत्याख्या परिभाषान्वर्थनामा प्रसिद्धा परम्परैव व्याकरणनिकाये पाणिनौ वा नियमप्रणयनाय प्रयोगात्मकसंशयविमोचनाय च शास्त्रप्रवृत्तप्रक्रियेति । परिभाषाः विना सूत्राणां प्रवृत्तिः प्रयोगक्षेत्रे नार्हति, सूत्रप्रयोगेऽपि च यथार्थतां लक्षस्थले प्रयोक्ता न लभते। शास्त्रकारैः एतदर्थं मानवप्रपञ्चे प्रयोगात्मकव्याकरणस्य सौकर्याय परिभाषाः स्वसूक्ष्मधिया सङ्कलिताः। विभिन्नरूपेण विभिन्नविधीनां प्रयोगसमये तन्मूलकवचनन्यायसंरचनं सूत्रसंरचनं वा परिभाषाणां स्वरूपम् । उपक्रमेऽस्मिन् यद्यपि बहवो ग्रन्थाः उपलभ्यन्ते तथापि भट्टनागेशस्य परिभाषेन्दुशेखरग्रन्थो विचारभूमौ स्वीक्रियते। परिभाषासञ्चरणे शास्त्रत्वसम्पादने वा आगमसमभिव्याहारे आगमविशिष्टस्यैव ग्रहणम् (यमुद्दिश्यागमो विहितस्स्यात् स आगमस्तस्यांशस्स्यात् तेषु सूत्रस्य प्रवृत्तिस्स्यादिति ) इत्यर्थं बोधयित्री यदागमपरिभाषैव कथं प्रयोगात्मकशब्दाब्धौ परिभाषापरिधौ च स्वाशयं प्रकटयति, तदेव रहस्यं प्रबन्धस्यास्य । अतो विषयस्य प्रतिपादनस्यावकाशोऽयं क्षुद्रे प्रबन्धकलेवरे मयाऽऽकलितः।

परिभाषाप्रयोगक्षेत्रविचारे प्रणिदापयतीति सिद्धौ प्र-उपसर्गपूर्वकं नि-उपसर्गपूर्वकञ्च दाधातोः **सत्यापपाशरूपवीणातुलश्लोकसेनालोमत्वचवमवर्णचूर्णचुरादिभ्यो णिच्**[२] इति सूत्रेण प्रेरणार्थकणिच्प्रत्यये **वर्त्तमाने लट्** इत्यनेन लटि प्रयोगे प्रथमपुरुषैकवचने तिप्प्रत्यये प्र नि दा इ ति इति स्थते **अर्तिह्रीब्लीरीक्नुयीक्ष्माय्यातां पुग्णौ**[३] इत्यनेन पुगागमे पुकः अनुबन्धलोपे च **दाधाघ्वधाप्** इति सूत्रेण घुसंज्ञायाः परं **नेर्गदनपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च**[४] इति सूत्रेण नकारस्य णकारे प्रणिदापयति इति रूपसिद्धिर्जायते।

अत्रोच्यते आगमसमभिव्याहारे आगमविशिष्टस्यैव ग्रहणम् इति शिष्टवचनेन यमुद्दिश्यागमो भवति,तस्य आगमकार्यविधानात् परं आगमविशिष्टेन एव अर्थः संगच्छते । अर्थात् अत्र दाधातोः ग्रहणेन दापिति समुदायस्य ग्रहणं भवति।

**दोषविचारः**

**दाधाघ्वदाप्**[५] इति सूत्रेण दारूपाधा रूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना, अतः अत्र पुगागमनात्परं यो दाप्धातुस्तिष्ठति तस्य घुसंज्ञा न भवतिष्यति । कारणम् **अर्थवद् ग्रहणे नानर्थकस्य ग्रहणम्**[६] इति परिभाषाबलात् सर्वदा प्रसङ्गेऽस्मिन् अर्थवतः पदस्यैव ग्रहणं क्रियते नानर्थकस्य । अस्यां परिस्थितौ अर्थवान् रूपी धातुः **डुदाञ् दाने**[७] न तु दैपः दाधातुरिति।

**परिभाषायाः अवतरणोद्देश्यम्**

दाप्धातुम् अर्थवान्निति विचिन्त्य यद्यपि अत्र क्रियते कार्यं तथापि स धातुः पुगागमयुक्तोऽस्ति इति कृत्वा प्रणिदापयति इति पदसिद्धिबेलायां घुसंज्ञाभावे णत्वकार्यं न भविष्यति, पुनः पदसिद्धौ क्लेशः समापतति । अतः शास्त्रकारः तदर्थं परिभाषामवतारयति - **यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्त**[८] इति ।

**परिभाषार्थः**

यमुद्दिश्यागमो भवति स आगमः तस्योद्देश्यस्य अङ्गीभूतो भवति अर्थात् तस्य अवयविनः अवयवः अस्ति, अतः आगमिबोधकशब्देन आगमविशिष्टेन वा तस्य ग्रहणं भवति । येन पदसिद्धौ सुगमता आगच्छति, फलस्वरूपेण प्रणिदापयति इत्यत्र णत्वकार्यं सम्पन्नं स्यादिति ।

**परिभाषायाः बीजम्**

परिभाषायां यदागमाः इति पदं तद्गुणिभूताः इत्यत्र हेतुः (कारणम्), तद्गुणिभूताः इति पदं तद्ग्रहणेन हेतुः (कारणम्)। अत्र ग्रह्धातोः बाहुलकात् कर्त्तरि अर्थे ल्युट्प्रत्ययः । अतः तत्र परिभाषायां मूले ग्राहकेण इत्युक्तम् ।

**परिभाषाया: अप्रवृत्तिपक्ष:**

प्रनिदारयति इत्यत्र दृधातो: निष्पन्नस्य दारि इत्यस्य घुसंज्ञा न भवति । यद्यत्र विचार्यते आदन्तधातुमभिलक्ष्य उद्दिश्य वा पुगागमो विधीयते तथापि दारि इत्यस्य निष्पत्ति: दृधातो: णिच्प्रत्यये अनुबन्धकृते सति **अचो ञ्णिति**[९] इति सूत्रेण ऋकारस्य वृद्धे: परमेव अस्ति । अत्र **उरण रपर:** इति सूत्रेण यद्यपि आकारस्य रपरत्वकारणात् आकारनिरूपितावयवत्वं रकारे तिष्ठति तथापि दानिरूपितावयवत्वं रकारे न जायते, कारणमत्र रकारस्य विधानं नास्ति रपरत्वैनैवागत: । फलस्वरूपेण परिभाषाया: अत्र अप्रवृत्तिर्दृश्यते ।

**परिभाषाया: अनित्यत्वम्**

**आने मुक्**[१०] इति सूत्रेण मुग्विधानसामर्थ्यात् एषा परिभाषा अनित्या । पच् धातो: **लट:** **शतृशानचावप्रथमासमानाधिकरणे**[११] इत्यनेन शानच् प्रत्यये सार्वधातुकसंज्ञायां शबागमे अनुबन्धकृते पच् अ म् आन इति दशायां परस्परसंयोगे विभक्तिकार्ये च पचमान: इति रूपसिद्धिर्जायते । अत्र विचार्यते यदि यदागमपरिभाषा अनित्या न भवति तर्हि अकारस्य अत्वम् अनया परिभाषया अम् इत्यत्र आगच्छति । तत: **अक: सवर्णे दीर्घ:**[१२] इति सूत्रबलात् सवर्णदीर्घेण पचान: इत्यनिष्टरूपं प्रयोगक्षेत्रं प्रभावयति । येन मुग्विधानव्यर्थं सत् परिभाषां ज्ञापयति इति ।

**अनित्यत्वस्वीकारे फलम्**

दीङ् धातो: लिटि आत्मने पदसंज्ञाया: परं प्रथमपुरुषैकवचने तप्रत्यये **लिटस्तझयोरेशिरेच्**[१३] इति सूत्रेण एशादेशे अनुबन्धलोपे च दी ए इति स्थिते धातो: द्वित्वे अभ्याससंज्ञाया: अनन्तरं **ह्रस्व:**[१४] इति सूत्रेण अभ्यास्य ह्रस्वे दि दी ए इति प्रयोगसमये **दीङो युडचि क्ङिति**[१५] इत्यनेन युडागमे अनुबन्धकृते दि दी य् ए परस्परसंयोगे दिदीये इति रूपसिद्धिर्जायते । यदि एषा परिभाषा अनित्या न स्यात् तर्हि युट् विशिष्टस्य ये इत्यस्य ए इति परिकल्पनेन दि दी ए इति दशां प्राप्नोति। तत: **एरनेकाचोऽसंयोगपूर्वस्य**[१६] इति सूत्रेण यणादेशे सति दिद्ये इत्यनिष्टरूपं प्रयोगक्षेत्रे प्रतिफलितं भवति ।

तथैव जहार इत्यत्र **आत औ णल:**[१७] इत्यनेन णल: विधाने जहार इति प्रयोगस्थाने जहा इत्यनिष्टरूपमपि दृश्यते । एतदर्थं एषा परिभाषा अनित्या स्वीकार्या ।

यदस्तु अत्र आरोपितावयवरूपेण आगमशब्दस्य प्रयोग: । **आद्यन्तौ टकितौ**[१८] इति सूत्रेण युडागम: टित् हेतो: आद्यवयवोऽस्ति । अत: केबलं वचनेन अवयवरूपेण स्वीक्रियते । पुन: अत्र **उरण रपर:**[१९] इत्यत्र रकार: अन्त्यावयवोऽस्तीति।

**वर्णग्रहणविषये परिभाषायाः प्रवृत्त्यप्रवृत्तिविचारः**

**आने मुक्** इति सूत्रेण विधीयमानं मुग्विधानं परिभाषायाः अनित्यतां ज्ञापयति । अतः कथ्यते यदि एषा ज्ञापिता भवतु, ततः कथ्यते वर्णग्रहणे एतस्याः परिभाषायाः अप्रवृत्तिः इति । वर्णग्रहणशब्दस्यार्थः वर्णमात्रवृत्तिधर्मः अतिदेशः वर्णमात्रवृत्तिधर्मघटितधर्मस्य अतिदेशश्च। अर्थात् उभयत्र परिभाषायाः अप्रवृत्तिः । भाष्ये **आने मुक्** इति सूत्रस्य विवेचनावसरे भगवता कण्ठरवेण एकः एषः पक्षः उपस्थापितः यत् अङ्गावयव-अकारनिमित्तमेव मुको विधानम् ।

वर्णग्रहणे परिभाषायाः प्रवृत्तिपक्षविचारे पचमानः इत्यत्र **तास्यनुदात्तेत्**... [२०] इत्यनेन स्वरसिद्धिर्न भविष्यतीत्याशङ्कायाम् अदुपदेशभक्तः(अवयवः) तद् ग्रहणेन ग्रहिष्यते इत्यनेन वचनेन वर्णग्रहणेन प्रवृत्तिः ।

**ङमो ह्रस्वादचि ङमुण्नित्यम्** [२१] इत्यनेन ह्रस्वादनन्तरं ङमन्तपदावयवस्य ङमो ङमुडागमो जायते येन कुर्वन् नुट् आस्ते इति स्थिते नुटः अनुबन्धलोपे परस्परसंयोगे कुर्वन्नास्ते इति रूपसिद्धिः । अत्र नकारस्य णत्वप्राप्तिमाशङ्क्य अनया परिभाषया नकारस्य पदान्तग्रहणेन पदान्तस्य णत्वनिषेधो भवति । यदि वर्णग्रहणे एषा परिभाषा प्रवृत्ता न भवति तर्हि आकरकारस्य प्रतिपादितं कथनम् असङ्गतं स्यात्, एतत् **ङमो ह्रस्वादचि ङमुण्नित्यम्** इति सूत्रस्य व्याख्यानावसरे भाष्यकारेण परिष्कृतम् ।

**परिभाषास्वीकारे फलम्**

**नेटि** [२२] इति सूत्रेण निषेधकार्यचरितार्थम्, अपि तु **णेरनिटि** [२३] इति सूत्रेण अनिट् ग्रहणं सार्थकं भवतीति फलम्।

इतोऽप्यधिकं यदागमपरिभाषायाः कार्यं विद्यते । कलेवरविस्तारभयात् विरम्यत इति शम्

**पादटीपणी**

१. म.भा. उद्योगपर्व,अ. - ४३, श्लो.सं. - ६१, पृ -१४४
२. पा.सू. - ३/१/२५
३. तत्रैव - ७/३/३६
४. तत्रैव - ८/४/१७
५. तत्रैव - १/१/२०
६. परि.भा. - १४
७. धातु - जुहोत्यादिप्रकरणम् - सं .१०

८. परि.भा. - ११
९. पा.सू. - ७/२/११५
१०. तत्रैव - ७/२/८२
११. तत्रैव - ३/२/१२४
१२. तत्रैव - ६/१/१०१
१३. तत्रैव - ३/४/८१
१४. तत्रैव - ७/४/५९
१५. तत्रैव - ६/४/६३
१६. तत्रैव - ६/४/८२
१७. तत्रैव - ७/१/३४
१८. तत्रैव - १/१/४६
१९. तत्रैव - १/१/५१
२०. तत्रैव - ६/१/१८०
२१. तत्रैव - ८/३/३२
२२ तत्रैव - ७/२/४
२३. तत्रैव - ६/४/५१

**सन्दर्भग्रन्था:**


१. महाभारतम्
२. महाभाष्यम्
३. वैयाकरणसिद्धान्तकौमुदी
४. धातुपाठः
५. परिभाषेन्दुशेखरः